No. ४७५८

Title कामेश्वरतंत्रे यंत्र संस्कार पद्धतिः

Author ×

Extent ३ पत्राणि Age ×

Subject तंत्रम्

यंत्रसंस्कारपद्धतिः कामेश्वरतंत्रे

४७ पत्र

4758

यन्त्रसंस्कारपद्धतिः कामेश्वरतन्त्रे

४७५८

प्रकारान्तरं

वामके

॥श्रीगणेशाय नमः॥ अथ यंत्रसंस्कारः॥ कौमेश्वरतंत्रे॥ भैरव्युवाच॥ चक्रभेदं महादे
वत्वत्प्रसादान्मयाश्रुतं॥ इदानीं श्रोतुमिच्छामि प्रतिष्ठाकर्मनिर्णयं॥ श्रीशंकर उवाच॥ शृणु देवि महाभागे
जगत्कारिणि कौलिनि॥ तस्योद्यापनकर्मांगं सर्वं चैव विनिर्णयं॥ स्नात्वा संकल्पयेन्मंत्री गुरोरर्चनमाचरेत्॥ रभे
पंचगव्यं ततः कृत्वा शिवमंत्रेण मंत्रितं॥ तत्र चक्रं क्षिपेन्मंत्री प्रणवेन समाकुलं॥ उद्धृत्य च ततश्चक्रं स्थापयेत् स्ना
स्वर्णपात्रके॥ पंचामृतेन दुग्धेन शीतलेन जलेन च॥ चंदनेन सुगंधेन कस्तूरीकुंकुमेन च॥ पयोदधिघृ
तक्षौद्रशर्कराख्यैरनुक्रमात्॥ ततो धूपांतरैः कुर्यात्संचामृतविधिं बुधः॥ हाटकैः कलशैर्दिवीमष्टभिर्वा राम
रिपूरितैः॥ काषायजलसंपन्नैः कारयेत्स्नानमुत्तमं॥ ततस्तीर्थजलेनैव मूलेन प्रणवेन च॥ स्ना १
नं समाप्य तं देवि स्थापयेत्स्वर्णपीठके॥ यंत्रराजाय विद्महे महायंत्राय धीमहि॥ तन्नो यंत्रः प्रचोदयात्॥

य=२

स्पृष्ट्वायंत्रं कुशाग्रेण गायत्र्या चाभिमंत्रयेत् ॥ अष्टोत्तरशतं देवि देवताभावसिद्धये ॥ आत्मशुद्धिं ततः कृ
त्वा षडंगै र्देवतां यजेत् ॥ तत्रावाह्य महादेवीं जीवन्यासं चकारयेत् ॥ उपचारैः षोडशभिर्महामुद्रादिभिः
सदा ॥ फलतांबूलनैवेद्यैर्देवीं तत्र समर्चयेत् ॥ पट्टसूत्रादिकं दद्याद्वस्त्रालंकारमेव च ॥ मुकुरं चामरं घं
टां यथायोग्यं महेश्वरि ॥ सर्वमेतत्प्रयत्नेन दद्यादात्महितेरतः ॥ ततो जपेत्सहस्रं च सकलेप्सितसि
द्धये ॥ बलिदानं ततः कुर्य्यात्त्राणमेशं करा जकं ॥ अष्टोत्तरशतं हुत्वा संपाताज्यं विनिःक्षिपेत् ॥ अष्टो
त्तरशतं होममाज्यधान्यैस्तिलेन च ॥ मूलमंत्रं समुच्चार्य्य मंत्री मंत्रांगमाचरेत् ॥ होमकर्मण्यशक्त
श्चेद्द्विगुणं जपमाचरेत् ॥ धेनुमेकां समानीय स्वर्णशृंगाद्यलंकृतां ॥ गुरवे दक्षिणां दद्यात्ततो देव्या
विसर्ज्जनं ॥ अथात्र प्रयोगः ॥ ॥ कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्य्यात् ॥ ॐ अद्ये

स्वरा

स्यादिअमुकगोत्रश्रीअमुकदेवशर्माअमुकदेवतायाःपूजार्थंअमुकयंत्रसंस्कारमहंकरिष्ये॥इति
संकल्प्य॥पंचगव्यमानीयहौमितिमंत्रेणाष्टोत्तरशतमभिमंत्र्य॥प्रणवेनयंत्रंतत्रनिःक्षिपेत्॥ततः
उत्तोल्यपात्रेस्थापयेत्॥ततःशीतलचंदनगंधकस्तूरीकुंकुमैःस्नापयित्वा॥पंचामृतमानीय॥हौमि
तिमंत्रेणपूर्ववच्छोधयित्वास्नापयेत्॥तत्रक्रमः॥प्रथमंक्षीरेणस्नापयित्वा॥पुनर्जलेनस्नापयि
त्वा॥धूपंदद्यात्॥एवंदध्याघृतेनमधुनाशर्करयाच॥ततोऽष्टभिःकलशैःकुंकुमगोरोचनाचंदन
मिश्रितैस्तोयैःस्नापयेत्॥सर्वत्रस्नानंतुमूलमंत्रेण॥ततोयंत्रमुत्तोल्यकुशाग्रेणयंत्रंस्पृष्ट्वा॥यंत्ररा
जायविद्महेमहायंत्रायधीमहि॥तन्नोयंत्रःप्रचोदयात्॥इतिअष्टोत्तरशतमभिमंत्र्य॥प्राणप्रतिष्ठांकुर्या राम
त्॥अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः॥ऋग्यजुःसामानिछंदांसिचैतन्यदेवताप्राण २

प्रतिष्ठायांविनियोगः॥ तद्यथा॥ आंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवतायाः प्राणाइहप्राणाः॥ ए
वंआंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवतायाः जीवइहस्थितः॥ एवंआंह्रींक्रोंयंरंलंवंशंषंसंहंहौं
हंसः अमुकदेवतायाः सर्वेन्द्रियाणिइहस्थितानि॥ एवंआंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवता
याः वाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ इतिप्राणान्प्रतिष्ठाप्य॥ तत्रअकृत
देवतामावाह्यषोडशोपचारादिनासंपूज्य॥ पंचोपचारैर्वापूजयेत्॥ ततः पट्टसूत्रादिकंदत्वा॥ अष्टोत्तर
सहस्रंशतंवाजपेत्॥ शक्तश्चेद्बलिंदद्यात्॥ ततः अष्टोत्तरशतहोमंकृत्वाप्रस्याहुतिसंपातंदद्यात्॥ होमा
मासामर्थ्याद्द्विगुणजपः कार्य्यः॥ ततोदक्षिणांदद्यात्॥ अच्छिद्रावधारणंकुर्य्यात्॥ इतियंत्रसंस्कारप्र राम
द्धतिः॥ ॥श्रीराम॥

गुरवे सुवर्णालङ्कृतां गां दक्षिणाञ्च दत्वा

~~[struck]~~ ईश्वर तन्त्रानुसारेण ३
वामके

पोथी १ [illegible] २ संवत्सर ११